# सुन्दरकाण्ड द्विषष्टितमः सर्गः (६२) – वनपालप्र दर्शनम्

तानुवाच हरिश्रेष्ठो हनुमान् वानरर्षभः ।
अव्यग्र मनसो यूयं मधु सेवत वानराः ॥ १ ॥

अहमावार यिष्यामि युष्माकं परिपन्थिनः ।
श्रुत्वा हनुमतो वाक्यं हरीणां प्रवरोङ्गदः ॥ २ ॥

प्रत्युवाच प्रसन्नात्मा पिबन्तु हरयो मधु ।
अवश्यं कृत कार्यस्य वाक्यं हनुमतो मया ॥ ३ ॥

अकार्यमपि कर्तव्यं किमङ्ग पुनरीदृशम् ।
अङ्गदस्य मुखाच् छ्रुत्वा वचनं वानरर्षभाः ॥ ४ ॥

साधु साध्विति संहृष्टा वानराः प्रत्य पूजयन् ।
पूजयित्वाङ्गदं सर्वे वानरा वानरर्षभम् ॥ ५ ॥

जग्मुर् मधुवनं यत्र नदीवेगा इव द्रुतम् ।
ते प्रविष्टा मधुवनं पालानाक्रम्य वीर्यतः ॥ ६ ॥

अतिसर्गाच्च पटवो दृष्ट्वा श्रुत्वा च मैथिलीम् ।
पपुः सर्वे मधु तदा रसवत् फलमाददुः ॥ ७ ॥

उत्पत्य च ततः सर्वे वनपालान् समागतान् ।
ताडयन्ति स्म शतशः सक्तान् मधुवने तदा ॥ ८ ॥

मधूनि द्रोण मात्राणि बाहुभिः परिगृह्य ते ।
पिबन्ति सहिताः सर्वे निघ्नन्ति स्म तथापरे ॥ ९ ॥

केचित् पीत्वाप विध्यन्ति मधूनि मधु पिङ्गलाः ।
मधूच्छिष्टेन केचिच्च जघ्नु रन्योन्य मुत्कटाः ॥ १० ॥

अपरे वृक्षमूले तु शाखां गृह्य व्यवस्थिताः ।
अत्यर्थं च मदग्लानाः पर्णान् यास्तीर्य शेरते ॥ ११ ॥

उन्मत्त भूताः प्लवगा मधुमत्ताश्च हृष्टवत् ।
क्षिपन्ति च तदान्योन्यं स्खलन्ति च तथापरे ॥ १२ ॥

केचित् क्ष्वेलां प्रकुर्वन्ति केचित् कूजन्ति हृष्टवत् ।
हरयो मधुना मत्ताः केचित्सुप्ता महीतले ॥ १३ ॥

कृत्वा केचिद् धसन्त्यन्ये केचित् कुर्वन्ति चेतरत् ।
कृत्वा केचिद् वदन्त्यन्ये केचिद् बुध्यन्ति चेतरत् ॥ १४ ॥

येऽप्यत्र मधुपालाः स्युः प्रेष्या दधि मुखस्य तु ।
तेऽपि तैर् वानरैर् भीमैः प्रतिषिद्धा दिशो गताः ॥ १५ ॥

जानुभिस्तु प्रकृष्टाश्च देव मार्गं  प्रदर्शिताः ।
अब्रुवन् परमोद्विग्ना गत्वा दधिमुखं वचः ॥ १६ ॥

हनूमता दत्तवरैर् हतं मधुवनं बलात् ।
वयं च जानुभिः कृष्टा देवमार्गं च दर्शिताः ॥ १७ ॥

ततो दधिमुखः क्रुद्धो वनपस् तत्र वानरः ।
हतं मधुवनं श्रुत्वा सान्त्वयामास तान्हरीन् ॥ १८ ॥

इहागच्छत गच्छामो वानरान् बलदर्पितान् ।
बलेन वारयिष्यामो मधु भक्षयतो वयम् ॥ १९ ॥

श्रुत्वा दधिमुखस् येदं वचनं वानरर्षभाः ।
पुनर् वीरा मधुवनं तेनैव सहसा ययुः ॥ २० ॥

मध्ये चैषां दधिमुखः प्रगृह्य तरसा तरुम् ।
समभ्य धावद् वेगेन ते च सर्वे प्लवङ्गमाः ॥ २१ ॥

ते शिलाः पादपांश्चापि पर्वतांश्चापि वानराः ।
गृहीत्वाऽभ्यगमन् क्रुद्धा यत्र ते कपिकुञ्जराः ॥ २२ ॥

अथ दृष्ट्वा दधिमुखं क्रुद्धं वानर पुङ्गवाः ।
अभ्यधावन्त वेगेन हनुमत् प्रमुखास् तदा ॥ २३ ॥

तं सवृक्षं महाबाहु मापतन्तं महाबलम् ।
आर्यकं प्राहरत् तत्र बाहुभ्यां कुपितोङ्गदः ॥ २४ ॥

मदान्धश्च न वेदैन मार्यकोऽयं ममेति सः ।
अथैनं निष्पिपेषाशु वेगवद् वसुधातले ॥ २५ ॥

स भग्न बाहूरु भुजो विह्वलः शोणितोक्षितः ।
मुमोह सहसा वीरो मुहूर्तं कपिकुञ्जरः ॥ २६ ॥

स कथञ्चिद्  विमुक्तस्तैर् वानरैर् वा नरर्षभः ।
उवाचैकान्त माश्रित्य भृत्यान् स्वान् समुपागतान् ॥ २७ ॥

एते तिष्ठन्तु गच्छामो भर्ता नो यत्र वानरः ।
सुग्रीवो विपुलग्रीवः सह रामेण तिष्ठति ॥ २८ ॥

सर्वं चैवाङ्गदे दोषं श्रावयिष्यामि पार्थिवे ।
अमर्षी वचनं श्रुत्वा घातयिष्यति वानरान् ॥ २९ ॥

इष्टं मधुवनं ह्येतत् सुग्रीवस्य महात्मनः ।
पितृ पैतामहं दिव्यं देवैरपि दुरासदम् ॥ ३० ॥

स वानरा निमान् सर्वान् मधुलुब्धान् गतायुषः ।
घातयिष्यति दण्डेन सुग्रीवः ससुहृज् जनान् ॥ ३१ ॥

वध्या ह्येते दुरात्मानो नृपाज्ञा परिभाविनः ।
अमर्ष प्रभवो रोषः सफलो नो भविष्यति ॥ ३२ ॥

एवमुक्त्वा दधिमुखो वनपालान् महाबलः ।
जगाम सहसोत्पत्य वनपालैः समन्वितः ॥ ३३ ॥

निमेषान्तर मात्रेण स हि प्राप्तो वनालयः ।
सहस्रांशु सुतो धीमान् सुग्रीवो यत्र वानरः ॥ ३४ ॥

रामं च लक्ष्मणं चैव दृष्ट्वा सुग्रीवमेव च ।
सम प्रतिष्ठां जगती माकाशान् निपपात ह ॥ ३५ ॥

सन्निपत्य महावीर्यः सर्वैस्तैः परिवारितः ।
हरिर् दधिमुखः पालैः पालानां परमेश्वरः ॥ ३६ ॥

स दीन वदनो भूत्वा कृत्वा शिरसि चाञ्जलिम् ।
सुग्रीवस्य शुभौ मूर्ध्ना चरणौ प्रत्यपीडयत् ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥